# INTERNATIONAL RESEARCH JOURNAL OF COMMERCE, ARTS AND SCIENCE

**ISSN 2319 – 9202**

*An Internationally Indexed Peer Reviewed & Refereed Journal*

**WWW.CASIRJ.COM**
**www.isarasolutions.com**

Published by iSaRa Solutions

## Contents

अग्नेः स्वरूपविचारः ........ 11

डॉ0 चद्रिकाउपाध्याय ........ 11

व्याकरणशास्त्रीय–दार्शनिक सिद्धान्ते समीक्षाः ........ 14

राजकुमार पाण्डेय ........ 14

AN ANALYTICAL STUDY ON THE FINANCIAL PERFORMANCE OF JINDAL STEEL AND POWER LIMITED ........ 17

Author Mr. R. N. Vivekanandar ........ 17

*Key words: Financial performance, Ratios, Steel, Steel producer.* ........ 17

A Study of Financial Performance Analysis of Mahindra & Mahindra and Tata Motors ........ 28

Nidhi Shankar Singh ........ 28

A proactive approach on Retention management in hotel industry ........ 41

Author 1: Wilson Lukose, ........ 41

Author 2: Dr Dattajirao Y. Patil, ........ 41

Factors Affecting To Business Strategies ........ 46

N. G. Krishna Kumar ........ 46

The Decentralized Governance: A Concept ........ 53

*Dr. Mohd. Touheed ........ 53

References ........ 60

“A STUDY OF COORDINATIVE ABILITIES OF INDIAN ........ 62

SOCCER PLAYERS AT DIFFERENT LEVELS OF PARTICIPATION” ........ 62

Dr. Nitin Chaudhary ........ 62

Dr. Amit Kumar Singh ........ 62

**हिंदी नाटकों में आंबेडकरवादी चेतना** ........ 67

**डॉ. नितीन धवडे** ........ 67

**SYSTEMATIC STUDIES ON WILD EDIBLE MUSHROOM *Morchella deliciosa* Fries COLLECTED FROM SHIMLA HILLS LOCATED IN Himachal Pradesh** ........ 70

**Dr. Renu Rana** ........ 70

Article ........ 76

## अग्नेः स्वरूपविचारः

डॉ0 चद्रिकाउपाध्याय

व्याख्यातावेद मं0 वि0 गि0
सं0 महा वि0
मानिकचौकसीतामढ़ी।

प्रथमतः अग्निशब्दविचारणायाम् यास्केन यद् विवेचितंतत्समीक्ष्यते– 'अग्निः कस्मात्' 'अग्रणीर्भवति–अग्र यज्ञेषुप्रणीयते।अयमग्निः सर्वेषुअर्थेषु (प्रयोजनेषु यज्ञादिकर्मसु) आत्मानम् स्वकीयंतेजः स्वरूपम् अग्रंसर्वेषां समक्षंनयतिस्थापतिकर्मफलं वा अग्रेनयतिकर्माधिपत्येव्यवस्थितः इत्यासौअग्रणीर्भवतिमुख्योभवतीत्यर्थः। यथासेनाधिपत्त्येअवस्थितः सेनंनयन् सेनानीः इत्युच्यते।अथवायज्ञेषुअसावग्निः अग्रंप्रथमं यथास्यात् तथा यज्ञेषुकर्तव्येषुकर्तव्यसम्पादनाय प्रणीयते। न तावत् किमपिअन्यत् कार्यक्रियते यावद् अयम् अग्निः न प्रणीयते।ततोऽग्नौस्थापिते एव अन्यानिकर्तव्यानिभवन्ति।पृषोदरादित्वात् अग्र+नीइत्यास्मात् शब्दसमूहात् सिद्धोभवति।

ततोऽग्रेनिरूक्तकारः 'अंगंनयतिसन्नममानः' यत्र अयमग्निः लौकिकेवैदिके वा प्रयोजनेसाधनत्वेनसन्नमयत्यात्मानं तत्र सन्नममान एव आतमानं प्रधानीकृत्य सर्वमन्यत् अंगमात्मानोंऽगतांनयतीतयंगनयनादंगनीः सन् अग्निरूच्यते। यद् वा यत्र तृणेकाष्ठे वा सन्नमत्याश्रयति तत्र सन्नममान एव आत्मनः अंगमंगतानयतिआत्मसात् सर्वकरोतिभस्मीकरोतीत्यर्थः तत्रैव निरूक्तस्थौलाष्ठीवेः सिद्धान्तो यथा 'अक्नोपनोभवतीतिस्थैलाष्ठाविः न क्नोपयति न स्नेहयति।पुनश्च 'त्रिभ्य आख्यातेभ्योजायतेइति शाकपूणिः।इतात् अक्ताद्–दग्धाद् वा एतद्विग्रहजन्य अग्निशब्दस्य उदाहरणत्वेनमन्त्रोऽयमुपन्यस्तः अग्निमीलेपुरोहितं यज्ञस्यदेवमृत्विजम्।होतारंरत्नघातम्।।

मन्त्रार्थस्तु–होताहम् अग्निं एतन्नामकमंदेवईडे यायामिअथवास्तौमिकीदृशमग्निम् यज्ञस्य पुरोहितम् यथाराज्ञः पुरोहितः तदमीष्टंसम्पादयति, तथाग्निरपि यज्ञस्योपेक्षितंहोमंसम्पादयति।अथवा यज्ञस्य संबंधिनीपूर्वभागेआह्वनीयरूपेणअवस्थितम्।पुनश्चदेवमदानादिगुणयुक्तम्।पुनश्चहोतारंदेवानाम् आह्वातारम्। यद्वाहोतारम्। ऋत्विजं च देवानां यज्ञेषुहोतृनामकऋत्विकअंग्निरेव।तथाहि 'अग्निर्वैदेवानांहोता' पुनश्चरत्नघातमंरत्नानि दधाति धारयतीतिरत्नघाः।अतिशयेनरत्नघाइतिरत्नधातमः तम्। ततः अमरकोग्रन्थेअग्निदेवस्य एतानिनामानिपठितानि–
अग्निवैश्वानरोवहि्नर्वीतिहोत्रो घनजयः। कृपीटयोनिर्ज्वलनोजातवेदास्तनूनपात्।।
बर्हिः शुष्माकृष्णवर्त्माम शोचिकेशउषर्बुधः।आश्रयासोबृहद्भानुः कृशानुः पावकोऽनजः।।
रोहिताश्ववायुसखः शिखावानाशुशुक्षणिः।।

इत्यादीनिअनेकानिनामानि दृश्यते।तेषां यदि व्याकरणद्ष्ट्या भाषाविज्ञानद्ष्ट्या वा विचारः क्रियतेतदामन्येपृथग्भूतोमहान् ग्रन्थोभवेत्।मयातुकेवलंमुण्डकोपनिषदिअग्निसम्बन्धिनम् कमपिमन्त्रं दृष्ट्वांनिबंधेऽत्र कश्चिद् विचारः प्रस्तूयते।अग्नेः संबंधेसंहिताग्रन्थेषुसर्वेषुब्राह्मणेषु च सर्वेषुश्रौतसुत्रेषुग्ह्यसूत्रेषु धर्मशास्त्रेषु धर्मसूत्रेषुपुराणेषुरामायणेषुमहाभारते च एत्रैव न अमितुबहुत्रस्घवेषुप्रशंसामहत्त्वंवैज्ञानिकोविचारश्य अवलोक्यते। तत्र प्रथमम् ऋग्वेद्संहितायामग्निमाश्रित्य प्रथमोमन्त्रः प्रवृत्तः अग्निमीडेपुरोहितमित्यादिना।ततश्चाग्रे एतत् प्रशंसायामाह–

अग्निः पूर्वेभि ॠषिभिरीड्योनूतनैरूत। स देवाँ एह वक्षति।।

अत्र अग्निः पूर्वेभिःपूर्ववर्तिभिः ऋषिभिः कल्पनान्तरीयेवर्तिभिः भृग्वड.गिरः प्रभृतिभिः ईडीतव्यः स्तुत्य इत्यर्थः।दुर्गवृत्तेरनुसारेणतुईडनंपूजनमित्यर्थः।पूजनमर्हतीति।तथानूतनेरूतनवतरैरस्माभिरपिस्तुत्यः। सः एतादृशः अग्निः स्तुतः सन् इहअस्माकं यज्ञे देवान् हविर्भुजो मधवादीन् आवक्षतिआवहतुआह्वयतुइत्यर्थः।अतएवमयमग्निः संहिताग्रन्थेषुदेवानामाहवान्कर्ताइत्युक्तः।पुनश्चायमेवाग्निः देवनांदूतोऽप्यस्ति।तथां च मन्त्रः–

अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवें देवाँ आसादयादिह।।

यमग्निमहंपुरः अग्रे दधेस्थापयामितंप्रतिउपब्रुवेकथयामि यत् हेअग्नेत्वमिहं यज्ञे देवान् इन्द्रादीन् आसादय स्थापय। यतोहित्वमेवदेवानांदूतः।देवमनुष्याणांसंबंध स्थापयिता।अग्निरेवमनुष्याणां श्रद्धया हुतानिहवींषिअभीष्टलामाय देवान् प्रापयति, तस्मादग्निः देवानांदूतः मनुष्याणां च श्रद्धास्पदः अस्ति।पुनश्चायमग्निः देवानांहोताप्यस्ति।तथाहि–

अग्निर्होताकविः क्रतुः सत्यश्चित्रः श्रवस्तमः।देवोदेवेभिरागमत्।।

यजुर्वेदे च पुनः देवोअग्निः स्विष्टकृद् देवान् यक्षद्यथायथंहोताराविन्द्रमश्विन।वाचावाचंसरस्वतीमग्निंससोमंस्विष्टकृत्स्विष्टइन्द्रः सुत्रामासविता वरूणो भिषगिष्टोदेवोवनस्पतिः स्विष्टादेवाआज्यपाः स्विष्टोअग्निरग्निनाहोताहोत्रे स्विष्टकृद्यशो न दघदिन्द्रियमूर्जमपचितिं स्वधांवसुवनेवसुधेयस्य व्यन्तु यज।। शोभनमिष्टभागंकरोतीतिस्विष्टकृत् अग्निर्देवो यथायथं यो यथा यष्टवयस्तथादेवान् वक्ष्यमाणान् यक्षत् इष्टवान्।होतारौअयंचाग्निरसौ च मध्यमोवायुः होतृमैत्रावरूणौ वा इन्द्रमश्विनाअश्विनाअश्विनौ च वाचामन्त्रेणवाच च यक्षत् सरस्वतीमग्निंसोमंच।किञ्च स्विष्टकृत् शोभन यज्ञकारीसुत्रामा शोभनरक्षकोऽस्ति।इन्द्रः स्विष्टः सुष्ठुइष्टः।सविता वरूणो भिषगिष्टः।वनस्पतिः देवः इष्टः आज्यपादेवाः प्रयाजानुजाः स्विष्टाः।अग्निः अधिष्ठाताअग्निनाभौमेनहविर्द्वारासुष्ठुइष्टः।किञ्च होतादैव्यः स्विष्टकृत्।होत्र मनुष्याय यशः इन्द्रियमूर्जमन्नमपचिंतिपूजां स्वधां पित्रर्थमन्नंदघत् ददतु।वसुवननाय वसुधनाय च देवाव्यन्तुहविरदन्तु।हेमनुष्यहोतः त्वमग्निं यज।अनेनेमन्त्रेणअग्नेव्यापकतामहत्त्वमुपयोगित्वं च प्रदर्शितंभवति। ऋग्वेदस्य बहुषुमन्त्रेषुअग्निः होतृत्वेनउल्लिखितः तद्यथा–अग्निंहोतारमीडतेअग्निंहोतारंप्रवृणेः ......
अग्निंहोतारंमन्ये एवंमन्त्रे अग्निः शुचिव्रततमइत्युक्तः।

पारिजातेतुअग्निसंबंधे एताः कारिकाद्रष्ट्व्याः सन्ति।पावकोलौकिको ह्यग्निः प्रथमः संप्रकीर्तितः।
अगिनस्तोमारूतोनामगर्भाधानेसर्वकर्मसु।सीमन्तेमंगलोनामप्रबलोजातकमणि।।
नाम्निवैपाथिर्वो ह्यग्निः प्राशनेतु शुचिः स्मृतः।सभ्येनामातुचौलेस्याद् व्रतादेशेसमुद्भवः।।
गोदानेसूर्यनामाग्निर्विवाहे योजकः स्मृतः।चतुर्थीकर्मणि घृतिरग्निस्तथापरे।।
प्रायश्चितेविधिश्चैवपाकयज्ञेषुसाहसः।देवानांहव्यवाहश्च पितृणांकव्यवाहनः ।।
शान्तिकेवरदः प्रोक्तः पौष्टिकेबलवर्द्धनः।पूर्णाहुत्यांमृडोनामक्रोधाग्निश्चाभिचारिके।।
वश्यार्थेकामदोनामवनदाहेतुदूषकः।कुक्षौतुजाठरः प्रोक्तः क्रव्याहोमृतदाहके।।
लक्षहोमेभीष्टदः स्यात् कोटिहोमेमहाशनः।समुद्रेवाडवोह्यग्निः क्षयेसम्वर्तकस्तथा।।
ब्रह्मागिगार्हपत्यस्तुईश्वरोदक्षिणस्तथा।विष्णुराहवनीयस्तुअग्निहोत्रे त्रयोग्नमः।।
आवसक्यस्तथाधानेवैश्वदेवेतुपावकः।ज्ञात्वैवमग्निनामानिगृह्यकर्मसमाचरेत्।।
केचितु एषामग्नीनांज्ञानाभावेविश्वरूपोनामाग्निः सर्वत्र भवतीतिनिश्चिन्वन्ति।

एतेषामग्नीनांनामानितालिकयाप्रदर्श्यन्ते–

कर्मनाम – अग्निनाम

1. लौकिककृत्ये –पावकः। 2. गर्भाधानकर्मणि–मारूतः ।
3. पुंसवनकर्मणि –चमसः। 4. मांगलिकर्मणि – शोभनः।
5. सीमन्तकर्मणि –मंगल । 6. जातकर्मणि –प्रबलः।
7. अन्नप्राशनकर्मणि – शुचिः। 8. नामकर्मणि –पार्थिवः।
9. चौलकर्मणि –सभ्यः। 10.व्रतादेशकर्मणि –समुद्भवः।
11. गोदानकर्मणि –सूर्यः। 12. विवाहकर्मणि – योजकः।
13. चतुर्थीकर्मणि –शिखी। 14. अपत्यते – घृतिः
15. प्रायश्चितकर्मणि–विधिः। 16. पाकयज्ञकर्मणि –साहसः।
17. देवकर्मणि –हव्यवाहः। 18. पितृकर्मणि –कव्यवाहनः।
19. शांतिकर्मणि –वरदः। 20. पौष्टिककर्मणि –बलवर्द्धनः।
21. पूर्णाहुतिकर्मणि –मृडी। 22. अभिचारकर्मणि –क्रोधाग्निः।
23. वश्यकर्मणि –कामदः। 24. वनदाहे –दूषकः।
25. अन्नपाचने –जाठरः। 26. मृतानांदाहे –क्रव्यादः।
27. लक्षहोमकर्मणि–अभीष्टदः। 28. काटिहोमकर्मणि –महाशनः।
29. समुद्रे (जलशेषणे)–वाडवः। 30. संहारकर्मणि –संवर्तः।
31. गार्हपत्ये –ब्रह्मा। 32. दक्षिणवेधाम् –ईश्वरः।
33. आहवनीये –विष्णुः। 34. अग्निहोत्रकर्मणि – (त्रयः) आहवनीयः गार्हपत्यः दक्षिणः

35. आघानकर्मणि –आवसथ्यः। 36. वैश्वदेवकर्मणि –पावकः।

अन्यत्र ग्रन्थअग्निसंबंधे एक रूपकमादाय स्वरूपकल्पनंकृतंविद्यते।तच्चस्वरूपं द्विशीर्षवानजमुखोऽग्निः चतुःश्रृंगवान् त्रिपादवाँश्च कल्पितः।तत्श्च सप्तहस्तवान् सप्तजिह्वानअस्ति।अतएवमुण्डकोपनिषदिसप्तानांजिह्वानाचर्चा दृश्यते । तथाहि–

कालीकराली च मनोज वा च सुलोहिता या च सुघूमवर्णा।
स्फुलिङ्ग्नीविश्वरूची च देवीलेलाय मानाइतिसप्तजिह्वाः।।

1. कालीजिह्वा।
2. कसलीजिह्वा।
3. मनोजवाजिह्वा।
4. सुलोहिताजिह्वा।
5. सुघूम्रवर्णाजिह्वा।
6. स्फुलिंगिनीजिह्वा।
7. विश्वरूचीजिह्वा।

# व्याकरणशास्त्रीय–दार्शनिक सिद्धान्ते समीक्षाः

राजकुमार पाण्डेय

ग्राम– छोटा ढुमरिया
टोला रक्सौल वार्ड नं0–
6, जिला – पूर्वी चम्पारण
(बिहार)

अयं गौरित्यनेन सास्नाद्यर्थोऽवगम्यते। अत्रेयं जिज्ञासा जागर्ति यद् गौरिति पदं कथं सास्नाद्यर्थं बोधयति, पदमिदं कथं नाऽन्यमर्थं प्रत्याययतीत्यत्रोच्यते– पदजन्यपदर्थोपस्थितौ त्रीण्यसाधारणानि कारणानि सन्ति, तानि च पदपदार्थशक्तिरूपाणि। एतानि कारणानि क्रमशो व्याक्रियन्ते। अत्राऽऽदौ पदज्ञानम्– पदज्ञानं करणं भवति। अत्र पदज्ञानमित्यस्य पदस्योच्चारणामित्यर्थः। पदज्ञानमित्यस्य कैश्चिज्ज्ञायमानं पदं करणामित्युक्तम्, तन्नोचितम्। यतो हि शब्दमात्रस्य ज्ञानं श्रोत्रादेव भवतीति प्राकृतिकम् पदमपि शब्दविशेषस्यैव नाम, अस्यापि ज्ञानं श्रोत्रादेव, परन्तु मौनिपुरूषेण– अक्षरलेखनेन हस्तादिचेष्टया वा परप्रत्यायितस्तत्र पदस्योच्चारणऽभावेऽपि केवलपदज्ञानमात्रेण शाब्दबोधो भवति। अतो ज्ञायमानं पदं न करणाम् किन्तु पदज्ञानमेव करणमस्तीति। यथाह विश्वनाथः– पदज्ञानन्तु करणम्। अत्र 'तु' इत्यस्य पृथगन्वयः, तथा च पदज्ञानं कारणम्, न तु ज्ञायमानं पदम् (= ज्ञानविषयीभूतं पदम्) करणम्, पदाभावेऽपि मौनिलोकादौ शाब्दबोधात् (न्या0 सि0 मु0 भा0 परि0 81) इति।

2. पदार्थज्ञानम्– पदज्ञानऽनन्तरं पदजन्या या पदार्थस्य स्मृतिः सैवव्यापारः। अन्यथा (=पदार्थज्ञानमात्रस्य व्यापारत्वस्वीकारे) पदज्ञानवतः पुरुषस्य प्रत्यक्षादिप्रमाणेन पदार्थस्योपस्थितौ सत्यामपि शाब्दबोधः स्यात्। न चैतद् युक्तं प्रतिभाति। अतपदजन्यपदार्थस्मृतेरेव व्यापारत्वम्। अत एवोक्तं विश्वनाथेन– द्वारं तत्र पदार्थधीरिति। अत्र तत्र (=पदज्ञाने) पदार्थधीः (= पदजन्यपदार्थस्मृतिः), द्वारम् ( व्यापारः) इति। अपि च–पदार्थधीरिति–पदजन्यपदार्थस्मरणं व्यापारः। अन्यथा–पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः (न्या0 सि0 मु0 भा0 परि0 81) इति।

3. शक्तिज्ञानम्– पदजन्या या पदार्थोपस्थितिः, सा चोपस्थितिरपि शक्तिज्ञानाधीनैवेति मन्तव्यम्। अन्यथा ( शक्तिज्ञानानधीने) घटादिपदात् समवायेनाऽऽकाशस्य स्मृतौ सतयामाकाशस्यति शाबदबोधापतिः स्यात्। सा न स्यादेतदर्थ शथ्त्या पदार्थोपस्थितेकारणात्वमित्युच्यते। अत एवाह विश्वनाथः शक्तिधीः सहक परिणीति। अपि च– तत्रापि वृत्या पदजन्यत्वं बोध्यमन्यथा घटादिपदात् समवायसम्बन्धनाऽऽकाशस्मरणो जाते आकाशस्यापि शब्दबोधापत्तेः (न्या0 सि0 मु0 भा0 परि0 81) इति।

4. वृति वृतिशचाऽर्थस्मृत्यनुकूलपदपदार्थयोपरस्परसंबंधः, स च द्वितीधः, शक्तिलक्षणाभेदात्। अत्र शक्तिरिति पदेन सह पदार्थस्य संबंधरूपः। स च संबंध ऐश्वरः सङ्क्तरूपः। यथाऽस्माच्छबदादयमर्थो बोद्धव्यः, इदं पदमिममर्थं बोधयतु इति च। अपि च आधुनिके नाम्न्यपि शक्तिरस्त्येव। अत एवैकादशेऽहनि पिता नाम कुर्यादित्यैश्वरः संकेतः। नव्या ऐश्वरः संकेत इत्यस्य शक्तित्वं न स्वीकुर्वन्ति। किन्त्विच्छैव शक्तिरित्येवमामनन्ति। तेनैतेनाऽऽधुनिकेऽपि नाम्नि शक्तिरस्त्येव। एतेनाऽऽधुनिके तु संकेते न शक्तिरिति स्वीकुर्वतो वादिनो मतमपास्तम्, आधुनिके नाम्न्यपि संकेतकर्त्तुरिच्छायाः सत्त्वात्। अत्र ब्रूते विश्वनाथः– वृतिश्च शक्तिलक्षणान्यतरः संबंधः। शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। स चाऽस्माच्छब्दादयमर्थो बोद्धव्य इतिश्वरेच्छारूपः। आधुनिके नाम्नि शक्तिरस्त्येव। एकादरशेऽहनि पिता नाम कुर्य्यादितीश्वरेच्छायाः सत्त्वात्। आधुनिके तु संकेते न शक्तिरिति सम्प्रदायः। नव्यास्तु ईश्वरेच्छा न शक्तिः, किन्त्विच्छैवं। तेनाऽऽधुनिके संकेतेऽपि शक्तिरस्त्येवेत्याहुः (न्या0 सि0 मु0 भा0 परि0 81) इति।

एवञ्च पदजन्यपदार्थोपस्थितावेव शक्तिरूपस्य कारणत्वमस्ति। यतो हि पूर्वं शक्तिग्रहाऽभावे सति पदज्ञाने जातेऽपि शक्तेस्सम्बन्धत्वेन पदार्थस्य स्मृतिर्न स्यात्। तथा चैकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवतीति न्यायेन यथा– हस्तिनं दृष्ट्वा हस्तिपकस्य स्मृतिर्भवति, एवं हस्तिपकं दृष्ट्वा हस्तिनः, तथा– शक्तेरभावे शक्तिसम्बन्धेन पदार्थस्य निष्पद्येत। अतः पूर्वशक्तिग्रहः, शक्तिग्रहे जाते सति पदज्ञानम्, पदज्ञाने जाते सति पदजन्यपदार्थोपस्थितिः,

पदजन्यपदार्थोपस्थितौ सत्यामेकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवतीति न्यायेनाऽर्थस्य स्मृतिः, अर्थस्मृतौ सत्यां शाब्दबोधो भवति। यथाह विश्वनाथः— शाबदबोधः फलम्, अपि चाऽत्रैव शक्तिज्ञानस्योपयोगः। पूर्व शक्तिग्रहाभावे पदज्ञानेऽपि तत्सम्बन्धेन स्मरणाऽनुपपत्तेः। पदज्ञानस्य चैकसम्बन्धिज्ञानविधयार्थस्मारकत्वम् (न्या० सि० मु० भा० परि० 81) इति। अमुमेवाऽर्थमनया कारिकया स्पष्टीकरोति—

पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः। शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।

इदं पदमिममर्थं बोधयति, अस्मिन्नर्थेऽस्य पदस्य शक्तिः। यथा— गौरित्यत्र गौरितिपदं सास्नादिमन्तमर्थं बोधयति। यतो ह्यस्य पदस्य सास्नाद्यर्थे शक्तिरस्ति, अतो गौरिति पदं तमेवाऽर्थमभिव्यनवित नाऽन्यमिति।

शक्तिग्रहश्च व्याकरणादितो भवति। एतेषां क्रमशो विवेचना प्रस्तूयते। अत्राऽऽदौ

1. **व्याकरणम्**— भू सत्तायाम्, 'भू' इति धातुः, 'तिप्' इति प्रत्ययः, 'शप' इति विकरणः, एवमागमाऽऽदेशवर्णविकारादीनां शक्तर्ग्रहं व्याकरणेनैव कश्चिन्निश्चिनोति। अस्य क्वचिद् बाधोऽपि दृश्यते। यथा— आख्यातस्य कर्त्तरि शक्तिरिति शाब्दिकः। तेन चैत्रपचतीत्यादावाख्यातवाच्येन कर्त्रा सह चैत्र स्याऽभेदनाऽन्वयो भवति। येन विक्लित्यनूकूलव्यापाराश्रयश्चैत्र अति शाब्दबोधः। अस्य गौरवदोषग्रस्तत्वादाख्यातस्य कर्त्तरि शक्तिरिति त्यज्यते, किन्तु लाघवादस्य कृतावेव शक्तिरिति तार्किकः। कृतिश्च चैत्रादिषु विशेषणतया प्रतीयते। एतेन विक्लित्यनुकूलकृतिमाश्चैत्र अति बोधः। न च आख्यातस्य कृतो शक्तिरित्युच्यते चेत् कर्त्तुरनुक्तत्वादनभिहिते (पा० सू० 2/3/18) इत्यास्याऽधिकारे स्थितेन कर्त्तु करणयोस्तृतीया (पा० सू० 2/3/18) इत्यनेन चैत्रादिपदानन्तरं तृतीया विभक्तिः स्यादिति वाच्यम्ः। कर्त्तुः संख्याया अनभिधानं यत्र भवति तत्रैवोक्तसूत्रस्य प्रवृतिर्भवतीति विवक्षितत्वात् संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरूद्धः प्रथमान्तमदोपस्थाप्यश्चैत्रः। अत्र कर्मत्वादीत्यस्येतरविशेषणत्वतात्पर्याऽविषयत्वमर्थः। तेनैतेन चैत्र गच्छतीत्यादौ चैत्रे संख्याया अन्वयो न भवति। यस्य कर्मादि विशेषणात्वेन तात्पर्य नास्ति, तस्य प्रतिषेधार्थ प्रथमान्त पदोरपस्थाप्य इति द्वितीयं विशेषणम्। अथवा धात्वार्थाऽतिरिक्तविशेषणत्वं प्रथमदलार्थ। तेन चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रस्येवार्थे विशेषणत्वान्न क्षतिः। स्तोकं पचतीत्यादौ क्रियाविशेषणानां कर्मत्वमित्यनुशासनात् स्तोकमित्यत्र द्वितीयान्तपदोपस्थाप्यत्वेन प्रथमान्तपदोपस्थाप्यं इति द्वितीयान्तपदोपस्थाप्यत्वेन प्रथमान्तपदोपस्थाप्यं इति द्वितीयविशेषणस्याऽसत्त्वान्न दोषः। अत आख्यातस्य कृतावेव शक्तिर्न तु कर्त्तरि। एवं तिङो भावनायां शक्तिरस्तीति मीमांसकः। अस्य मते चैत्र पचतीत्यत्र विक्लित्यनुकूला भावना इति बोधः। अनया चैत्रादेकर्त्तुराक्षेपो भवति। यतो हि कर्त्तारं बिना भावनाऽनुपपन्ना भवति। अस्य मतपि न समीचीनं प्रतीभाति। यतो ह्यस्मिन् मतेऽपि महान् गौरवदोषोऽस्ति। तथाहि—रथो गच्छतीत्यादौ तु स्वव्यापारे आश्रयत्वे वा लक्षणयैव सामञ्जस्यं संकेच्छेत। जानातीत्यादौ त्वाश्रयत्वे, नश्यतीत्यादौ प्रतियोगित्वे च निरूढलक्षणाया कल्पना स्यादिती महदगौरवम्। अतो लाघवादस्मन्मतमेव युक्तम्।

2. **आप्तवाक्यम्**— आप्तवाक्यादपि शक्तेर्ग्रहो भवति। यथा—कोकिलपिकपदवाच्य इत्याप्तवचनात् पिकपदस्य शक्तिग्रहो भवति।

3. **वाक्यशेषः**— वाकयस्य शेषादपि शक्तिग्रहो भवति। यथा— यवमयश्चरूर्भवतीत्यत्र सवपदस्य दीर्घ्शूकविशेष आर्य्याणां प्रयोगः कङ्गौ च म्लेच्छानाम्। यत्र हि अथाऽन्या ओषधयो म्लाचन्तेऽथैते मोदनानास्तिष्ठन्तीति वाक्यस्य शेषाद्दीर्घशूके शक्तिर्निश्चीयते, कङ्गौ तु शक्तेर्भ्रमात्प्रयोगः नानाशक्तिकल्पने गौरवात्। हर्य्यादिपदे तु विनिगमनाभावा — न्नानाशक्तिकल्पनमेव युक्तम्। अतो वाक्यशेषादपि शक्तिग्रहः।

4. **विवरणम्** — विवरणादपि शक्तेर्ग्रहो भवति। विवरणञ्च तत्समानार्थकपदान्तरेण तदर्थकथनम्। यथा— घटोऽस्ति, इत्यस्य कलशोऽस्ति, इत्यस्य कलशोऽस्ति, अनेन विवरणेन घटपदस्य कलशे शक्तेर्ग्रहो भवति

एवं पचति इत्यस्य पाकं करोतित्यनेन विवरणदाख्यातस्य यत्नार्थकत्वं कल्प्यते। एवं अस् भुवित्यस्य भू सत्तायामित्यनेन विवरणेन अस् धातोर्भुवि शक्तेर्ग्रहः।

5. प्रसिद्धपदसान्निध्यम्–

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यादृव्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।

तात्पर्य्याऽनुपपत्तिः–

यष्टीप्रवेशय इत्यत्र यष्टेप्रविशिक्रियायान्वयस्योपपतिरस्त्येव। किन्तु भोजनतात्पर्येणैव यष्टी प्रवेशय इत्यतिदेशवाक्यस्य प्रयोगः। तथा चाऽत्र प्रविशिक्रियायामन्वयस्योपपत्तेस्सत्त्वेऽपि भुजिक्रियायां यष्टेस्तात्पर्य्याऽनुपपत्तिर्भवति। अतो यष्टीरित्यस्य यष्टिवरे लक्षणा भवति। एतेन यष्टीप्रवेशय इत्यस्य यष्टिधरान् प्रवेशयेति बोधः। इयं जहत्स्वार्थलक्षणोत्युच्यते, गंगादिपदस्य स्वार्थ विहाय तीरदेरन्यार्थस्य बोधकत्वात्।

काकेभ्यो दधि रक्ष्यतामित्यत्र काकेभ्यो दघ्नो रक्षणम्, माजरिभ्यो नेति वक्तुर्नेतत् तात्पर्य्यमस्ति। किन्तु सर्वतो दघ्नो रक्षणातात्पर्य्यमेव काकेभ्यो दधि रक्ष्यतामित्यस्य। अतोऽत्र काकपदस्य दघ्न उपघातके लक्षणा प्रवर्त्तते। इत्यलम्।